उक्तौ तृतीय आशौचश्राद्धादीनां च सङ्ग्रहौ ।
अध्यायत्रयगा अर्थाः प्रोक्ता आचारकाण्डगाः ॥

End:—

तदेवं भगवान् पराशराचार्यः काण्डद्वयेनाचारप्रायश्चित्तप्रपञ्चमभिधाय शास्त्रमुपसंहरति ॥

एतत्पाराशरं शास्त्रं श्लोकानां शतपञ्चकम् ।
द्विनवत्या समायुक्तं धर्मशास्त्रस्य सङ्ग्रहः ॥ इति ॥
पाराशराध्ययनस्य वेदाध्ययनवत् स्वर्गसाधनत्वमाह—
यथाऽध्ययनकर्माणि धर्मशास्त्रमिदं तथा ।
अध्येतव्यं प्रयत्नेन नियतं स्वर्गगामिभिः ॥ इति ॥

Colophon:—

इति महाराजाधिराज–राजपरमेश्वर–वैदिकमार्गप्रवर्तक–श्रीबुक्कणभूपाल-साम्राज्यधुरन्धरस्य माधवामात्यस्य कृतौ पराशरस्मृति-व्याख्यायां माधवीयायां द्वादशोऽध्यायः ॥
काण्डद्वयं समाप्तम् ॥

Subject:—

This is a brief commentary by Mādhava on the contents of the Smṛti of Parāśara as in No. 40.

प्रतिपाद्यविषयः—

No. 40 तमे पराशरस्मृतिकोशे दर्शितानामंशानां माधवार्यकृतं सङ्ग्रहरूपं व्याख्यानमिदम् ॥

वक्तव्यविशेषः—

एतत्कृतमेव विस्तृतमप्यन्यद्दृश्यते । अमुद्रितं चेदम् ॥

No. 61 (2490).

* पराशरस्मृतिव्याख्या (सङ्ग्रहमाधवीयम्).

* Parāśara Smṛti Vyākhyā (Saṅgraha Mādhavīyam).

Author—Mādhavāchārya.
Substance—Palm-leaf.
Size—$16\frac{7}{8} \times 1\frac{3}{8}$ inches.
Character—Grantha.
Folios—1-94.
Lines on a page—7.
Letters in a line—52.
Age of MS—Old.

Condition of MS—Good.
Complete or incomplete—Incomplete.
Acquired or transcribed—Acquired.
Correct or incorrect—Not so very correct.

Beginning, end, colophon, etc.—as in No. 60.

No. 62 (2765/1).

* पराशरस्मृतिव्याख्या लघुहितधर्माख्या.

Parāśara Smṛti Vyākhyā. Laghuhitadharmākhyā.

Author—Kāmesvara Vasantha Somayāji.
Substance—Palm-leaf.
Size—$14\frac{3}{4} \times 1\frac{1}{2}$ inches.
Character—Telugu.
Folios—1-113.
Lines on a page—7.
Letters in a line—58.
Age of MS—Old.

Condition of MS—Not good (Worm-eaten here and there).
Complete or incomplete—Complete.
Acquired or transcribed—Acquired.
Correct or incorrect—Not so very correct.

Beginning :—

सुमुखाय नमस्तुभ्यं सुजनावनदीक्षिणे ।
यत्कटाक्षं प्रतीक्षन्ते ब्रह्माद्याः कार्यसिद्धये ॥
पराशरोक्तमार्गेण हितधर्मो वितन्यते ।
कलौ युगेऽत्र सुकरः श्रीकामेश्वरयज्वना ॥

कलौ हि मनुष्याणामन्नादिगतप्राणतयाऽल्पदेहाबलत्वाच्चोराद्युपद्रवेण धनलोपाद्गुरुपूजापरित्यागेन अल्पज्ञानत्वाच्च स्नानादिकर्माणि यथाविधि कर्तुं न शक्यन्ते । तथा हि स्नानोपवासादिकं कर्म दृढगात्रसाध्यं, न हि मन्दबुद्धी रोगी वा तत्र समर्थः । आतिथ्यादिकं च धनबलसाध्यं, न हि दरिद्रोऽन्नदानसमर्थः । व्रतब्रह्मयज्ञवेदान्तविचारादिकं च ज्ञानबलसाध्यं, न हि मन्दबुद्धिस्तत्र समर्थः ॥

End :—

कलिकालेऽनुष्ठापकतया वेदवदध्येतव्यत्वं विदधदेव शास्त्रं परिपूरयति—

यथाऽध्ययनकर्माणि धर्मशास्त्रमिदं तथा ।
अध्येतव्यं प्रयत्नेन नियतं स्वर्गगामिभिः ॥

इति । निगदव्याख्यानमेतदिति माधवीयम् ॥

Colophon:—

इति श्रीहेम्मसूरिकुलजलधिसुधानिधिचिद्रूपयज्वनः प्रपौत्रस्य यज्ञेश्वर-
यज्वपौत्रस्य प्रीतिवसन्तसोमयाजिपुत्रस्य कामेश्वरवसन्तसोम-
याजिनः कृतौ पराशरधर्मशास्त्रव्याख्याने
हितधर्मे द्वादशोऽध्यायः ॥

सुमुखस्य प्रसादेन सौमुख्यमिह जायताम् ।
विदुषां शुद्धभावानां वचस्यल्पेऽपि मामके ॥ हरिः ओम् ॥

Subject :—

This is a commentary under the title of "Laghu hitadharma" by Kameswara Vasanta Somayāji on the Smṛti of Parāśara.

प्रतिपाद्यविषयः—

No. 40 तमे पराशरस्मृतिकोशे दर्शितानामंशानां संग्रहेणार्थप्रतिपादनपरा कामेश्वरवसन्तसोमयाजिना प्रणीता लघ्वीयं व्याख्या लघुहितधर्माख्या ॥

Noteworthy Features.—The Commentator seems to have written another commentary on the same work, enittled, "Guruhitadharma," as is substantiated by his own statement, "See, for details, my work, Guruhitadharma." He is later, in date, than Mādhava since he refers to him in his work. While interpreting the oft-quoted stanza (verse 30, chapter IV) of Parāśara Smṛti, Mādhava has stated that the remarriage of widows in cases mentioned in the verse was permissible in days prior to the Kali Age. But the author of the present work has gone far and opined that it is permissible even in Kali Age since the Smṛti of Parāśara is accepted as binding specially in that Age. He is thus up against most of the traditional customs and usages so ably and enthusiastically defended by scholars like Mādhavāchārya and Vaidyanātha.

वक्तव्यविशेषः—

अयं च व्याख्याता अर्वाचीनः, यतो माधवीयवैद्यनाथीयग्रन्थांस्तत्रतत्रोदाहरन्, माधववैद्यनाथादिनिबन्धृभिः कलौ दूरोत्सारितान् स्त्रीपुनर्विवाह-रजोनिवर्त्यकायिकव्यभिचारदोषादीन् स्वयमनिषिद्धान् मन्यते । 'विस्तरस्त्वस्मत्कृते बृहति गुरुहितधर्मे द्रष्टव्यः' इति तत्र तत्र वक्ष्यमाणतया एतत्प्रणीतैवान्याऽपि गुरुहितधर्माख्या काचन व्याख्या स्यादिति ज्ञायते । अमुद्रिता चेयं व्याख्या ॥

No. 63. (3512)

* पराशरस्मृतिव्याख्या लघुहितधर्माख्या.

* Parāśara Smṛti Vyākhyā Laghuhitadharmākhya.

Author—Kāmesvaravasanta Somayāji.
Substance—Palm-leaf.
Size—$16\frac{1}{4} \times 1\frac{3}{8}$ inches.
Character—Grantha.
Folios—1–99.
Lines on a page—9.
Letters in a line—54.

Age of MS.—Old.
Condition of MS—Good.
Complete or incomplete—Incomplete.
Acquired or transcribed—Acquired.
Correct or incorrect—Incorrect.

Beginning :—

(आदौ 'श्रुतिं पश्यन्ति' इत्यादीनि ततः पराशरस्मृत्यर्थसंग्राहकानि माधवीयपद्यानि । ततः "अथातो हिमशैलाग्रे—धर्मः पराङ्मुखः" इति मूलं च ॥)

एवं पूर्वार्धे धर्मपालकतोक्ता । उत्तरार्धे फलाभाव उक्तः । अत्र धर्मशब्दः काम्यधर्मपरः । आचारशब्दो नित्यनैमित्तिकधर्मपरः । आचारभ्रष्टदेहानामित्युक्त्याऽऽचारस्य देहधर्मत्वं लब्धम् । तेन बृहस्पत्युक्तानां दयादीनामाचारत्वनिरासः ॥

End :—

अथ पतितसंयोगस्य कलौ महापातकत्वाभावेऽपि पातकत्वं चतुर्थोक्तमिति मनसि निधाय उक्तानुक्तसमुदितपापेषु यथार्हं प्रायश्चित्तान्याह—

आसनाच्छयनाद्यानात्संभाषात्सहभोजनात् ।
संक्रामन्ति हि पापानि तैलबिन्दुरिवाम्भसि ॥

इति । आसनमेकपीठादौ, शयनमेककटादौ, यौनं दांपत्यसंबन्धः, संभाषणं संलापः, न तु भाषणमात्रम्, सहभोजनमेकपङ्क्ताविति निमित्तानि । नैमित्तिकान्याह—

चान्द्रायणं यावकं च तुलापुरुष एव च ।
गवां चैवानुगमनं सर्वपापप्रणाशनम् ॥

Subject:—

As in No. 62.

Noteworthy Features.—This is an imperfect copy with lacunæ in the beginning and at the end.

वक्तव्यविशेषः—

कोशेऽस्मिन् आदौ No. 62 तमकोशे 1–9 पत्रपर्यन्तं दृश्यमानव्याख्याभागो विलुप्तः । तथाऽन्तेऽपि द्वित्रश्लोकव्याख्या च विलुप्तेति ज्ञायते । अमुद्रिता चेयं व्याख्या ॥

No. 64 (A 136/5).

पुलस्त्यस्मृतिः.

Pulastya Smṛtiḥ.

Author—Sage Pulastya.
Substance—Paper.
Size—$12\frac{3}{4} \times 8$ inches.
Character—Telugu.
Folios—40–41.
Lines on a page—20.
Letters in a line—16.
Age of MS—Old.
Condition of MS—good.
Acquired or transcribed—Acquired.
Complete or incomplete—Complete.
Correct or incorrect—Incorrect.

Beginning :—

कुरुक्षेत्रे महात्मानं पुलस्त्यमृषयोऽब्रुवन् ।
तांश्च धर्मान् प्रकारांश्च वद नस्त्वं समासतः ॥
एवं पृष्टः प्रत्युवाच सर्वांस्तान्पृच्छतो द्विजान् ।
पञ्चधा हि स्थितो धर्मः श्रृणुध्वं द्विजसत्तमाः ॥

End :—

उक्तः पञ्चविधो धर्मश्श्रेयोभ्युदयहेतुकः ।
पुरुषाणां यथायोगं स च सेव्यः फलार्थिनाम् ॥
सद्यस्त्वप्रौढबालाया अन्यथा वत्सराच्छुचिः ।
कन्यायां . . . . . लक्षण्यायां सहेतुकम् ॥
अदत्तायां त्रिरात्रेण दत्तायां पक्षिणी भवेत् ।
[1] परस्वगृहभेदेन न्यायोऽयं समुदीरितः ॥

Colophon :—

इति पुलस्त्यधर्मशास्त्रं समाप्तम् ॥

Subject:—

Dharma or duty of man is described with examples dividing it into five kinds as Varnadharma or class duties, Āśramadharma or duties of the order, Varṇāśrama dharma or duties of caste and order of life, Guṇadharma, or duties incidental to possession of certain qualities and Naimittikadharma or occasional duties.

प्रतिपाद्यविषयः—

अत्र वर्णधर्मः, आश्रमधर्मः, वर्णाश्रमधर्मः, गुणधर्मः, नैमित्तिकधर्मः, इति धर्मस्य पञ्चधा विभजनं तत्तदुदाहरणं च प्रदर्शितम्। तथा ब्राह्मणादीनां इज्यादिकर्मनिरूपणं, ब्रह्मचारिगृहस्थवानप्रस्थपरिव्राजां धर्माः अहिंसादिसामान्यधर्माः धर्मप्रमाणं ऊढानूढकन्यामरणे आशौचविधिः, इत्येते प्रतिपाद्यन्ते ॥

Noteworthy Features.—This work has been printed in Telugu characters with a Telugu commentary in Madras. The MS copy seems to be identical with that described under 5374 in the India Office Library Catalogue.

वक्तव्यविशेषः—

आन्ध्रलिप्यामियं स्मृतिर्मुद्रिता दृश्यते । अशुद्धलेखनामेनामवलम्ब्य आन्ध्रभाषायां टीका च निर्मिता मुद्रिता दृश्यते ॥

---

[1] इदमर्धं कोशान्तरे न दृश्यते.

No. 65 (A 669/4).

पुलस्त्यस्मृतिः.

Pulastya Smṛtiḥ.

Author—Pulastya.
Substance—Paper.
Size—13 × 8⅜ inches.
Character—Telugu.
Folios—11th only.
Lines on a page—27.
Letters in a line—25.
Age of MS—Old.
Condition of MS—good.
Complete or incomplete—Complete.
Acquired or transcribed—Acquired.
Correct or incorrect—Incorrect.

Beginning, end and colophon—As in No. 64.

No. 66 (3154/16).

पुलस्त्यस्मृतिः.

Pulastya Smṛtiḥ.

Author—Pulastya.
Substance—Palm-leaf.
Size—14¾ × 1½ inches.
Character—Grantha.
Folios—135-136.
Lines in a page—8.
Letters in a line—59.
Age of MS—Old.
Condition of MS—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

Beginning :—

ऋषय ऊचुः—

कुरुक्षेत्रे महात्मानं पुलस्त्यमृषयोऽब्रुवन् ।
तांश्च धर्मान् प्रकारांश्च नो वद स्मार्तमागमम् ॥
एवं पृष्टः प्रत्युवाच सर्वांस्तान् पृच्छतो ऋषीन् ।
पञ्चधाऽवस्थितं धर्मं श्रृणुध्वं द्विजसत्तमाः ॥

वर्णधर्मस्स्मृतस्त्वेक आश्रमाणामतःपरम् ।
वर्णाश्रमस्तृतीयस्तु गुणनैमित्तिकस्तथा ॥
वर्णमेकं समाश्रित्य योऽधिकारः प्रवर्तते ।
वर्णधर्मस्स विज्ञेयो यथोपनयनं त्रिषु ॥

End :—

तदर्थश्च प्रयासोऽयं स च सेव्यः फलार्थिना ।
उक्तः पञ्चविधो धर्मः श्रेयोभ्युदयहेतुकः ॥
पुरुषाणां यथायोगं स च सेव्यः फलार्थिनाम् ।
सद्यस्त्वप्रौढबालायामन्यथा वत्सराच्छुचिः ॥
प्रदत्तायां त्रिरात्रेण दत्तायां पक्षिणी भवेत् ।

Colophon :—

इति पुलस्त्यप्रोक्तं धर्मशास्त्रं समाप्तम् ॥

Subject, etc.—As in No. 64.

No. 67 (2852/12).

*** प्रज्ञाहारीतस्मृतिः.**

* Prajñā Hārīta Smṛtiḥ.

Author—Sage Prajñā Hārīta
Substance—Palm-leaf.
Size—10 × 1⅝ inches.
Character—Grantha.
Folios—1–4.
Lines on a page—9.
Letters in a line—60.
Age of MS—Old.

Condition of MS—Good.
Complete or incomplete—Complete.
Acquired or transcribed—Acquired.
Correct or incorrect—Incorrect.

Beginning :—

अथातः प्रज्ञाहारीतं धर्मशास्त्रं व्याख्यास्यामः—
चण्डाल्या गमनं यत्र प्रमादाद्ब्राह्मणस्य तु ।
प्राजापत्यत्रयं कुर्याच्चान्द्रायणमतः परम् ॥

ब्रह्मकृच्छ्रं ततः पश्चात्पूतो भवति वै द्विजः ।
एवमेव विधिं कुर्यादेवं क्षत्रियवैश्ययोः ॥
चण्डाल्या यत्र शूद्रस्य व्यवायगमनं यदि ।
सशिखं वपनं कृत्वा विप्राणामनुशासनात् ॥
ओदनं चैकभुक्तं वै मासमेकं समाचरेत् ।

End:—

पितॄणां देवतानां च ब्राह्मणा मुखमेव हि ।
तस्माच्च ब्राह्मणान् भक्त्या पूजयेद्विधिवत्ततः ॥
तस्मात्पितृभिस्सह पूजनीया ? विप्रान् पूजयेद्विधिवत्प्रमुक्तः ।
एवं तु तस्य द्रविणं जनश्च स्वर्गं च गच्छेत्स . . . यैः ॥

इति प्रज्ञाहारीते धर्मशास्त्रे सप्तमोऽध्यायः ॥
धर्मशास्त्रमिदं सपाप्तम् ॥

Colophon:—

इति प्रज्ञाहारीते धर्मशास्त्रे सप्तमोऽध्यायः ॥
धर्मशास्त्रमिदं समाप्तम् ॥

Subject:—

Deals with Prāyaścittas or purificatory rites for beating or killing cows, for brahma-hatya or murder of a Brahmin; for touching a Chandala, for taking the food prepared or served by a chandala, etc.

प्रतिपाद्यविषयः—

इदमध्यायसप्तकपरिमितं प्रज्ञाहारीतनामकं धर्मशास्त्रम् । अत्र प्रथमेऽध्याये — ब्राह्मणादीनां प्रामादिकचण्डालीगमने चण्डालान्न-भोजनादौ च प्रायश्चित्तम्, द्वितीये—चण्डालैस्सह संयोगे प्रायश्चित्तम्, तृतीये—वयःकर्माद्यनुरोधेन प्रायश्चित्तविधानम्, गवां हनने ताडनादौ च प्रायश्चित्तम्, तुरीये—उद्बन्धनाकृष्टस्य ब्राह्मणशरीरे ताडनादिना शोणितोत्पादकस्य च प्रायश्चित्तम्, देशान्तरमृतस्य आहिताग्नेश्शरीरा-लाभे संस्कारक्रमः, अभोज्यभोजनादौ प्रायश्चित्तं च, पञ्चमे — ब्रह्महत्याप्रायश्चित्तम्, षष्ठे—निमन्त्रणानर्हाणां निरूपणम्, सप्तमे—प्राजापत्यकृच्छ्रं, निमन्त्रणार्हा विप्रा इत्येते संग्रहेण प्रतिपाद्यन्ते ॥

Noteworthy Features.—This unpublished work attributed to Hārīta consists of seven chapters and is quite different from the two published Smṛtis of Hārīta, the Laghu Harita and the Vṛddha or Bṛhad Harita.

वक्तव्यविशेषः—

स्मृतिरियममुद्रिता, समग्रा चास्मिन् कोशे दृश्यते । लघुवृद्धहारीतस्मृती त्वितो विभिन्ने मुद्रिते दृश्येते ॥

No. 68 (A 136/6).

बुधस्मृतिः.

Budha Smṛtiḥ.

Author—Sage Budha.
Substance—Paper.
Size—$12\frac{3}{4} \times 8$ inches.
Character—Telugu.
Folios—42–43.
Lines on a page—20.
Letters in a line—16.
Age of MS—Old.
Condition of MS—Good.
Correct or incorrect—Incorrect.
Complete or incomplete—Complete.
Acquired or transcribed—Acquired.

Beginning:—

अथातो बुधधर्मशास्त्रं व्याख्यास्यामः—श्रेयोऽभ्युदयसाधनो धर्मः । गर्भाष्टमे ब्राह्मणो वसन्त आत्मानमुपनयेत् । एकादशे क्षत्रियो ग्रीष्मे । द्वादशे वैश्यो वर्षासु । मेखलाजिनदण्डकमण्डलूपवीतानि धारयेत् । वेदानधीत्य शुश्रूषां कुर्वन् दृष्टार्थस्तमाराधयेत् ॥

End:—

मन्त्रौषधप्रयोगेण परं निस्संज्ञं कृत्वा राज्यं गृह्णीयात् । तत्र देवब्राह्मणान् पूजयेत् । एवं कृते दृष्टमदृष्टं च लभते फलमिति ॥

Colophon:—

इति बुधप्रोक्तं धर्मशास्त्रम् ॥

Subject:—

Deals, in brief, with the definition of Dharma, the duties of a Brahmacarin, marriage and its forms, the Saṃskāras, the means of subsistence for a Brahmin, the duties of Kings, etc.

प्रतिपाद्यविषयः—

धर्मलक्षणं, द्विजानामुपनयनकालः, ब्रह्मचारिकृत्यं, समावर्तनम्, विवाहः तद्भेदाः, गर्भाधानादिसंस्काराः, ब्राह्मणादिवृत्तयः, राजधर्माः. इत्येते समासेनात्र प्रतिपाद्यन्ते ॥

Noteworthy Features.—It is a small treatise in prose. It is printed in Madras in Telugu characters with Telugu commentary. Its exposition of the topics is very brief. It appears to be a summary of larger works on Dharma.

No. 69 (A 669/5).

बुधस्मृतिः.

Budha Smṛtiḥ.

Author—Sage Budha.
Substance—Paper.
Size—$13 \times 8\frac{3}{8}$ inches.
Character—Telugu.
Folios—13.
Lines on a page—25.
Letters in a line—24.
Age of MS—Old.
Condition of MS—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.
Acquired or transcribed—Acquired.

Beginning, End, etc.—As in No. 68.

No. 70 (3154/17).

बुधस्मृतिः.

Budha Smṛtiḥ.

Author—Sage Budha.
Substance—Palm-leaf.
Size—$14\frac{3}{4} \times 1\frac{1}{2}$ inches.
Character—Grantha.

Folios—136-137.
Lines on a page—8.
Letters in a line—52.
Age of MS—Old.
Condition of MS—Good.
Correct or incorrect—Not so very correct.
Complete or incomplete—Complete.
Acquired or transcribed—Acquired.

Beginning, End, etc.— As in No. 68.

No. 71 (C. 1972).

बृहत्पाराशरस्मृतिः.

Bṛhat Pārāśara Smṛtiḥ.

Author—Sage Suvrata.
Substance—Paper.
Size—$11\frac{1}{2} \times 4\frac{3}{4}$ inches.
Character—Devanāgari.
Folios—1-132.
Lines on a page—10.
Letters in a line—42.
Age of MS—Old.
Condition of MS—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.
Acquired or transcribed—Acquired.

Beginning:—

व्यक्ताव्यक्ताय देवाय वेधसेऽनन्ततेजसे ।
नमस्कृत्य प्रवक्ष्यामि धर्मान् पाराशरोदितान् ॥
अथातो हिमशैलाग्रे देवदारुवनाश्रये ।
व्यासमेकाग्रमासीनं द्विजाः पृच्छन्ति धार्मिकाः ॥
मनुष्याणां हितं धर्मं वर्तमाने कलौ युगे ।
वर्णानामाश्रमाणां च किञ्चित्साधारणं वद ॥
युगेषु त्रिषु ये प्रोक्ता धर्मा मन्वादिभिर्मुने ।
शक्यन्ते नैव ते कर्तुं वर्णैराश्रमवासिभिः ॥
स पृष्टो मुनिभिर्व्यासो बहुभिः परिवेष्टितः ।
प्रष्टुं जगाम पितरं धर्मान् पाराशरं ततः ॥

सर्वेषामाश्रमाणां च वरे बदरिकाश्रमे ।
संविवेशाश्रमे तस्मिन् योगीव वेधसस्तनुम् ॥
नानापुष्पफलाकीर्णे फलैः पुष्पैरलंकृते ।
नदीप्रस्रवणानेकैः पुण्यतीर्थोपशोभिते ॥
मृगपक्षिभिराकीर्णे देवतायतनावृते ।
यक्षगन्धर्वसिद्धानां नृत्तगीतसमाकुले ॥
तस्मिन् ऋषिसभामध्ये शक्तिपुत्रः पराशरः ।
सुखासीनो महातेजा मुनिमुख्यगणावृतः ॥
कृताञ्जलिपुटो भूत्वा व्यासस्तु मुनिभिस्सह ।
प्रदक्षिणाभिवादैश्च मुनिभिः परिपूजितः ॥
ततस्सन्तुष्टमनसा पराशरमहामुनिः ।
व्यासस्य स्वागतं ब्रूयादासीनो मुनिपुङ्गवः ॥
वत्साद्य स्वागतं तेऽस्तु महर्षीणां समन्ततः ।
कुशलं कुशलेत्युक्त्वा व्यासः पृच्छत्यतः परम् ॥
यदि जानासि मां भक्तं स्नेहोऽस्ति यदि वा मयि ।
धर्मं ब्रूह्यथ मे तात अनुग्राह्योऽस्म्यहं यदि ॥
श्रुतास्ते मानवा धर्मा गार्गेया गौतमास्तथा ।
वासिष्ठाः काश्यपाश्चैव तथा गोपालकस्य च ॥

End:—

परंपराणां परमं विचिन्त्य परात्परं दिष्टपदादतीतम् ।
क्षणादिकालमशेषमेव प्रयाति तं तत्पदमव्ययं च ॥
तमात्मरूपं परमव्ययं च विश्वेश्वरं विश्वभरं प्रपद्ये ।
शान्तिं च गत्वा विधिना च योगी प्रयाति तद्वै पदमव्ययं च ॥
कालज्ञानेन योगोऽयं योगिभिर्ध्यानकारिभिः ।
मुमुक्षुभिस्सदा ज्ञेयं निरालम्बं परं पदम् ॥
पराशरोदितं शास्त्रं चतुर्वर्णाश्रमाय च ।
वेदितव्यं प्रयत्नेन सदा ध्येयं द्विजातिभिः ॥
श्रावयिष्यति यश्श्राद्धे ब्राह्मणान् भक्तितत्परः ।
प्राप्स्यन्ति पितरस्तस्य तृप्तिं वै शाश्वतीं द्विजाः ॥
दश द्वादश चाष्टौ वा सप्त षट्पञ्चगाश्च यः ।
दैविके पैतृके वाऽपि श्लोकाश्श्राव्या द्विजातिभिः ॥

य इदं श्रुणुयाद्वाऽपि श्रावयेत्पाठयेदपि ।
सम्प्रध्वस्ततमस्तोमो ब्रह्मलोकमवाप्नुयात् ॥
त्रिभिश्श्लोकसहस्रैस्तु त्रिभिर्वृत्तशतैरपि ।
पराशरोदितं धर्मशास्त्रं प्रोवाच सुव्रतः ॥
नमोऽस्तु याज्ञवल्क्याय मनवे विष्णवे नमः ।
गौतमाय वसिष्ठाय नमः पाराशराय च ॥

Colophon :—

इति श्रीबृहत्पाराशरे धर्मशास्त्रे सुव्रतप्रोक्तसंहितायां योगोपदेशो नाम द्वादशोऽध्यायः ॥
॥ इति बृहत्पाराशरस्मृतिः समाप्ता ॥

Subject:—

Deals, in detail, with the six daily duties of a householder. The work ends with a disquisition on Yoga and its practices.

प्रतिपाद्यविषयः—

अत्र द्वादशभिरध्यायैः प्राधान्येन स्नानपूर्वकसंध्याजपहोमदेवपूजावैश्वदेवातिथिसत्काराख्यानि दिने दिने कर्तव्यानि षट्कर्माणि सविस्तरं निरूप्य अन्ते योगोपदेशेन स्मृतिरियमुपसंहृता दृश्यते ॥

Noteworthy Features.—It is an extensive work in twelve chapters. It is published in Calcutta. The work, according to the last verse, is said to contain 3,300 verses, while the printed edition contains only 3,000. The introductory verse of the work repeats the story stated in the Parāśara Smṛti and many of the verses of the first chapter of the two books are almost identical.

Since it is a recast of Parāśara Smṛti by Suvrata, it is styled Bṛhatpārāśara Smṛti

वक्तव्यविशेषः—

मुद्रितेयं स्मृतिः कल्कत्तानगरे दृश्यते । कोशेऽस्मिन् समग्रा च दृश्यते । ग्रन्थबाहुल्यात् मुद्रितापेक्षयाऽत्र बहवः पाठभेदा उपलभ्यन्ते ।

इतोऽन्या लघ्वी पराशरस्मृतिः श्रीमन्माधवाचार्येण व्याख्याता मुद्रिता चोपलभ्यते। सुव्रताख्यमुनिकर्तृकत्वेऽप्यस्याः स्मृतेः पराशरोपदिष्टार्थ-गर्भिततया बृहत्पाराशरस्मृतिव्यवहार इत्यवसीयते। यथाहि भृगु-प्रणीताया मनूपदिष्टार्थशरीरवत्या मनुस्मृतिरिति व्यपदेशः। अत एव प्रथमाध्यायान्ते—

पराशरो व्यासवचो निशम्य यदाह शास्त्रं चतुराश्रमार्थान्।
युगानुरूपं च समस्तवर्णहिताय वक्ष्यत्यथ सुव्रतस्तान्॥

इत्यभिहितं दृश्यते॥

No. 72 (1656/5).

बृहस्पतिस्मृतिः.

Bṛhaspati Smṛtiḥ.

Author—Bṛhaspati.
Substance—Palm-leaf.
Size—$10 \times 1\frac{5}{8}$ inches.
Character—Telugu.
Folios—63–65.
Lines on a page—11.
Letters in a line—40.
Age of MS—Old.

Condition of MS—Good.
Correct or incorrect—Not very correct.
Complete or incomplete—Complete.
Acquired or transcribed—Acquired.

Beginning :—

इष्ट्वा क्रतुशतं राजा समाप्तवरदक्षिणः।
मघवान् वाग्विदां श्रेष्ठं पर्यपृच्छद्बृहस्पतिम्॥
भगवन् केन दानेन स्वर्गतस्सुखमेधते।
यदक्षय्यं महार्हं च त्वं ब्रूहि वदतां वर॥

End :—

धर्मशास्त्रमिदं शक्र मया तव सुभाषितम्।
अधीत्य ब्राह्मणो गच्छेद्ब्रह्मसद्म च शाश्वतम्॥
श्लोकानां तु चतुष्षष्टिं श्रावयेद्यश्शृणोति वा।
पर्वसु प्रयतो नित्यमुक्तदानफलं लभेत॥

Colophon:—

इति बृहस्पतिकृतं धर्मशास्त्रम् ॥

Subject:—

It is a panegyric on gifts.

प्रतिपाद्यविषयः —

हिरण्यदानादि, भूमिदानप्रशंसा, ब्रह्मस्वमाहात्म्यं, देववित्तमहिमा, तद्धर्तुर्दोषाः, दानपात्रं, महादानानि, दानप्रकारः, दानार्हतिथ्यादि, अन्नदानप्रशंसनं, एतद्धर्मशास्त्राध्ययनश्रवणफलं, इत्येतान्यत्र निरूपितानि ॥

Noteworthy Features.—This is a small treatise found in the Smṛti collections of Jivananda and the Anandasrama Press. Bṛhaspati is here represented as instructing Indra about gifts. One or two verses of this work is found quoted by Apararka and the author of the Dānaratnākara.

वक्तव्यविशेषः—

No. 76 तमे बृहस्पतिस्मृतिकोशेऽध्यायद्वयदर्शनादसमग्रेयमिति ज्ञायते ॥

No. 73 (2852/7).

बृहस्पतिस्मृतिः.

Bṛhaspati Smṛtiḥ.

Author—Bṛhaspati.
Substance—Palm-leaf.
Size—$19\frac{1}{8} \times 1\frac{3}{4}$ inches.
Character—Grantha.
Folios—193–194.
Lines on a page—9.
Letters in a line—64.
Age of MS—Old.
Condition of MS—Good.
Correct or incorrect—Not so very correct.
Complete or incomplete—Complete.
Acquired or transcribed—Acquired.

Beginning, End, and Colophon, etc.—As in No. 72.

No. 74 (3534/8).

बृहस्पतिस्मृतिः.

Bṛhaspati Smṛtiḥ.

Author—Bṛhaspati.
Substance—Palm-leaf.
Size—$15\frac{3}{4} \times 1\frac{1}{2}$ inches.
Character—Grantha.
Folios—264–268.
Lines on a page—6.
Letters in a line—40.

Age of MS—Old.
Condition of MS—Good.
Correct or incorrect–Correct.
Complete or incomplete—Complete.
Acquired or transcribed—Acquired.

Beginning, etc.—As in No. 72.

No. 75 (4487/1).

बृहस्पतिस्मृतिः.

Bṛhaspati Smṛtiḥ.

Author—Bṛhaspati.
Substance—Palm-leaf.
Size—10×2 inches.
Character—Nāgari.
Folios—1–3.
Lines on a page—9.
Letters in a line—46.

Age of MS.—Old.
Condition of MS—Good.
Correct or incorrect—Incorrect.
Complete or incomplete—Complete.
Acquired or transcribed—Acquired.

Beginning:—

As in No. 72.

End:—

अष्टमुष्टि भवेत्किञ्चित् किञ्चिदष्टौ च पुष्कलम् ।
पुष्कलानि च चत्वारि आढकः परिकीर्तितः ॥
आढकश्चतुरो द्रोणा इत्येवं मानलक्षणम् ।

Colophon :—

इति बार्हस्पत्यस्मृतिस्समाप्ता ॥

Subject:—

As in No. 72.

Noteworthy Features.—In addition to what is contained in No. 72, there is, at the end, a table of weights and measures.

वक्तव्यविशेषः—

No. 72 कोशे दृश्यमानग्रन्थापेक्षयाऽत्रान्ते भूसुवर्णादिमानप्रदर्शनपरो ग्रन्थभागोऽधिको दृश्यते ॥

No. 76 (3154/2).

*** बृहस्पतिस्मृतिः.**

* Bṛhaspati Smṛtiḥ.

Author—Bṛhaspati.
Substance—Palm-leaf.
Size—$14\frac{3}{4} \times 1\frac{1}{2}$ inches.
Character—Grantha.
Folios—3–11.
Lines on a page—8.
Letters in a line—56.
Age of MS—Old.
Condition of MS—Worm-eaten.
Correct or incorrect–Correct.
Complete or incomplete—Complete.
Acquired or transcribed—Acquired.

Beginning:—

As in No. 72.

End :—

मिथुनीभूय च तया सर्वां रात्रिं न संवसेत् ।
नाध्यापयेत्तच्छयने यस्मिन् शेते स्त्रिया सह ॥
इत्येवं देवदेवेश तव प्रोक्तं मयाऽधुना ॥

धर्मशास्त्रमिदं पुण्यमधीत्य द्विजसत्तमः ।
स याति परमं स्थानं पुनरावृत्तिवर्जितम् ॥

Colophon :—

इति बृहस्पतिस्मृतौ द्वितीयोऽध्यायः ॥
बृहस्पतिस्मृतिस्समाप्ता ॥

Subject:—

Deals with gifts, ācāras and daily duties.

प्रतिपाद्यविषयः—

अत्राध्यायद्वयदर्शनेन No. 72 तमकोशे दृश्यमानेयं स्मृतिरसमग्रेति ज्ञायते। तत्रैव प्रथमाध्याये प्रतिपाद्यो विषयो द्रष्टव्यः। द्वितीयाध्याये—ब्राह्ममुहूर्तकर्तव्यं, शौचविधिः, गण्डूषविधिः, स्नानविधिः, सन्ध्योपासनम्, सन्ध्याकालः, अग्निपरिचर्या, ब्रह्मयज्ञः, विष्णुपूजा, निषिद्धधान्यादि, देवनिवेदनानर्हाः, वपनविधिः, तत्कालः, प्रातःस्नानाभावे प्रत्यवायः, वैश्वदेवविधिः, अतिथिपूजा, भोजनविधिः, अभक्ष्याः, शयनविधिः, इत्यादयो निरूप्यन्ते ॥

Noteworthy Features.—In addition to the chapter on gifts, there is another on ācāras and daily duties. It is doubtful whether it formed part of the original work.

वक्तव्यविशेषः—

अत्रत्यकोशान्तरेषु मुद्रिते च एकाध्यायमात्रपरिमितैवेयं स्मृतिर्दृश्यते। अत्र तु कोशेऽध्यायद्वयपरिमिताऽधिका दृश्यते। अत्र मुद्रितापेक्षया तत्र तत्र पाठवैलक्षण्यादिकं च दृश्यते ॥

No. 77 (A. 137/4).

भरद्वाजस्मृतिः.

Bharadvāja Smṛtiḥ.

Author—Sage Bharadvāja.	Size—$12\frac{3}{4} \times 8$ inches.
Substance—Paper.	Character—Telugu.

Folios—341-517.
Lines on a page—16.
Letters in a line—16.
Age of MS—Old.
Condition of MS—Good.
Correct or incorrect—Not so very correct.
Complete or incomplete—Complete.
Acquired or transcribed—Acquired.

Beginning :—

हेमाद्रिशिखरे रम्ये सुखासीनं महौजसम् ।
भरद्वाजं मुनिश्रेष्ठं सर्वविद्यातपोनिधिम् ॥
पुण्याकृतिं पुण्यशीलं ब्रह्मनिष्ठं जितेन्द्रियम् ।
तमासाद्य मुनिश्रेष्ठा भृग्वाद्या मुनिपुङ्गवाः ॥

End :—

सहस्रसङ्ख्यया होमस्तत्तदिष्टं प्रयच्छति ।
तस्माद्विजः पुरश्चर्यां सम्यक्कृत्वैव हावयेत् ॥
किमप्यसाध्यमेताभिर्व्याहृतीभिर्न जातुचित् ।
तस्मादेतास्समाश्रित्य साधयेत्सकलं द्विजः ॥

Colophon :—

इति भरद्वाजस्मृतौ व्याहृतिविधानं नाम विंशोऽध्यायः ॥
भरद्वाजस्मृतिस्समाप्ता ॥

Subject :—

Deals with the rules pertaining to bath, utterance of the Gayatri, the Vyahṛtis, the wearing of the sacred thread, etc.

प्रतिपाद्यविषयः —

अत्र विंशत्यध्यायेषु न दृश्यते सप्तदशोऽध्यायः, पञ्चमश्चासमग्रः ॥

तत्र प्रथमेऽध्याये—शास्त्रोपोद्घातः, द्वितीये—प्राच्यादिदिक्परिज्ञानोपायः, तृतीये—विण्मूत्रोत्सर्जनशौचविधिः, चतुर्थे—उदकोप-

स्पर्शविधिः, पञ्चमे—दन्तधावनविधिः, षष्ठे—स्नानोर्ध्वपुण्ड्रधारणविधिः, सप्तमे—सन्ध्योपासनविधिः, अष्टमे—जपमालया जपविधिः, नवमे—जपकालिकनिषिद्धकर्माणि, दशमे—गायत्रीपुरश्चरणक्रमः, एकादशे—गायत्र्यर्थप्रतिपादनं, द्वादशे—गायत्रीपूजाविधिः, त्रयोदशे—गायत्रीध्यानं, चतुर्दशे—गायत्रीमहाध्यानं, पञ्चदशे—पूजार्हद्रव्याणि, षोडशे—यज्ञोपवीतनिर्माणं, (सप्तदशो नास्ति) अष्टादशे—यज्ञोपवीतधारणविधिः व्याहृतीनां ऋषिच्छन्दोदेवतानिरूपणं च, एकोनविंशे—कुशपवित्रादिलक्षणं, विंशे—व्याहृतिजपविधिः, इत्येते सविस्तरं सुललितया शैल्या प्रतिपाद्यन्ते ॥

Noteworthy Features.—This version contains only twenty chapters. But as stated in the work itself, the Smṛiti seemed to have contained twenty-five chapters, since twenty-five topics are supposed to have been dealt with in this work, a chapter having been set apart for each topic. All the MS copies, available of the work, contain only twenty chapters. It has, therefore, to be surmised that the last five chapters dealing with Sādhana and Prāyaścitta might have been lost.

वक्तव्यविशेषः—

कोशेऽस्मिन् एकोनविंशतिरध्याया दृश्यन्ते। अन्ते च यद्यपि भारद्वाजस्मृतिस्समाप्ता इति लिखितं दृश्यते। तथाऽपि प्रथमाध्यायान्ते प्रमेयपरिगणनावसरे दृश्यमानस्य—

यज्ञोपवीतं च कुशः प्रणवो व्याहृतिस्ततः।
साधनं प्रायश्चित्तं च क्रमोऽयं शास्त्रसङ्ग्रहे॥

इत्यस्य पद्यस्य पर्यालोचनया साधनप्रायश्चित्तनिरूपणपरभागस्यात्रादर्शनात् तत्रैवोत्तरत्र—

पञ्चविंशतिकर्माणि प्रोक्तान्यध्यायरूपतः।
एकैकस्मिन् क्रमाध्याये प्रोक्तैका परिसंस्फुटम्।
सपञ्चविंशत्यध्यायैः कर्मक्लृप्तिर्यथाक्रमम्।
धर्मशास्त्रं समाख्यातं भारद्वाजमहर्षिणा॥

इति सुस्पष्टोक्तेरस्याः स्मृतेः पञ्चविंशत्यध्यायपरिमिततयाऽत्र कोशे एकोनविंशत्यध्यायानामेव दर्शनात् अन्ते स्मृतिसमाप्तिसूचनं लेखकप्रमादायातमिति निश्चीयते॥

No. 78 (A 669/11).

भरद्वाजस्मृतिः.

Bharadvāja Smṛtiḥ.

Author—Sage Bharadvāja.
Substance—Paper.
Size—13 × 8⅜ inches.
Character—Telugu.
Folios—88–120.
Lines on a page—26.
Letters in a line—24.
Age of MS—Old.

Condition of MS—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.
Acquired or transcribed—Acquired.

Beginning, etc.—As in No. 77.

No. 79 (3154/18).

भरद्वाजस्मृतिः.

Bharadvāja Smṛtiḥ.

Author—Sage Bharadvāja.
Substance—Palm-leaf.
Size—14¾ × 1½ inches.
Character—Grantha.
Folios—137–149.
Lines on a page—7.
Letters in a line—52.
Age of MS—Old.

Condition of MS—Good.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.
Acquired or transcribed—Acquired.

Beginning:—

अथ सन्ध्यात्रयोपास्तिविधानं कथयाम्यहम् ।
द्विजन्मनां परिस्पष्टं समस्ताभीष्टसिद्धये ॥
ब्रह्माद्याकारभेदेन या भिन्ना कर्मसाक्षिणी ।
भास्वतीश्वरशक्तिस्सा सन्ध्येत्यभिहिता बुधैः ॥

End :—

विषुवायनसंक्रान्तिग्रहणेषु त्र वैधृतौ ।
व्यतीपाते महापूजामशक्तश्चेत्समाचरेत् ॥
एतद्रहस्यं परमं देयं देव्या महार्चनम् ।
सत्कुलाय सुशीलाय वेदाध्यायिद्विजन्मने ॥

Colophon:—

इति भरद्वाजस्मृतौ देवीपूजामहिमानुवर्णनं नाम द्वादशोऽध्यायः ॥

Subject:—

As in No. 77.

प्रतिपाद्यविषयः—

अत्र सप्तम-एकादश-द्वादशास्त्रय एवाध्याया लिखिताः । तत्र सप्तमेऽध्याये—सन्ध्यात्रयोपासनविधिः, एकादशे—गायत्रीमन्त्रप्रतिपाद्यार्थः, द्वादशे—गायत्रीपूजाविधिः, इत्येतेऽभिधीयन्ते ॥

Noteworthy Features.—This is an incomplete copy of the work and contains Chapters VII, XI and XII only.

वक्तव्यविशेषः—

कोशेऽस्मिन् सप्तमैकादशद्वादशाध्यायास्त्रय एव दृश्यन्ते ॥

No. 80 (1050).

मनुस्मृतिः.

Manu Smṛtiḥ.

Author—Sage Bhṛgu.
Substance—Palm-leaf.
Size—$14\frac{7}{8} \times 1\frac{1}{8}$ inches.
Character—Telugu.
Folios—1–116.
Lines on a page—7.
Letters in a line—52.
Age of MS—Old.

Condition of MS—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.
Acquired or transcribed—Acquired.

Beginning :—

मनुमेकाग्रमासीनमभिगम्य महर्षयः ।
प्रणिपत्य यथान्यायमिदं वचनमब्रुवन् ॥
भगवन् सर्वधर्माणां यथावदनुपूर्वशः ।
अन्तरप्रभवाणां च धर्मान्नो वक्तुमर्हसि ॥
जरायुजाण्डजानां च तथा सस्वेदजोद्भिदाम् ।
भूतग्रामस्य सर्वस्य ह्युत्पत्तिं प्रलयं तथा ॥
आचाराणां च सर्वेषां कार्याणां च विनिर्णयम् ।
यथाकालं यथायोगं वक्तुमर्हस्यशेषतः ॥
त्वमेव ह्यस्य धर्मस्य विधानस्य स्वयंभुवः ।
अचिन्त्यस्याप्रमेयस्य कार्यतत्वार्थवित्प्रभो ॥
स तैः पृष्टस्समागम्य अमितौजा महात्मभिः ।
प्रत्युवाचार्चितान् सर्वान्महर्षीन् श्रूयतामिति ॥

End :—

एष सर्वाणि भूतानि कर्मभिर्व्याप्य तिष्ठति ।
जन्मवृद्धिक्षयैर्नित्यं संसारयति चक्रवत् ॥
एवं यस्सर्वभूतेषु पश्यत्यात्मानमात्मना ।
सर्वत्र समतामेत्य ब्रह्माप्येति सनातनम् ॥
इत्येतन्मानवं शास्त्रं भृगुप्रोक्तं पठन् द्विजः ।
भवत्याचारवान्नित्यं यथेष्टामाप्नुयाद्गतिम् ॥

Colophon :—

इति मानवधर्मशास्त्रे भृगुप्रोक्तायां संहितायां द्वादशोऽध्यायः ॥
मनुस्मृतिः सम्पूर्णा ॥

Subject :—

The work is divided into twelve chapters and describes creation and dissolution of the world, the units of time from nimeṣa to year, the four yugas, the nature of Dharma, the Varṇa and Āśrama Dharmas, the Prāyaścittas, etc.

प्रतिपाद्यविषयः—

द्वादशाध्यायीपरिमितेयं मानवी स्मृतिः । 'तत्र प्रथमेऽध्याये— जगत्सृष्टिक्रमः, नारायणशब्दार्थः, महाप्रलयः, जीवस्योत्क्रमणादि,

मन्वन्तराहोरात्रादिपरिमाणं, भूतपञ्चकसर्गक्रमः, युगानुरूपेणायुःप्रमाणादि,एतच्छास्त्राध्ययनाधिकारी, इत्येतानि प्रतिपाद्यन्ते। द्वितीयेऽध्याये—धर्मलक्षणप्रमाणदेशादि, जातकर्मादिसंस्काराः, उपनीतधर्मा मेखलादण्डादिधारणभिक्षाचरणाचार्योपासनाध्ययनादयश्च निरूप्यन्ते। तृतीयेऽध्याये—समावर्तनोद्वाहविधी, उद्वाहभेदाः, तल्लक्षणं तद्गुणाः, पञ्चमहायज्ञश्राद्धादयो गृहिणां धर्माः प्रतिपाद्यन्ते। चतुर्थे—शिलोञ्छादिना जीवनम्, स्नातकधर्माः, अनध्यायाः, बैडालव्रतिकानां लक्षणादि, दानधर्मप्रशंसादि, अयाचितादिभिक्षा, भोज्यान्नादयश्च निरूप्यन्ते। पञ्चमे—भक्ष्याभक्ष्याणि, जननमरणाशौचं, सुवर्णादिद्रव्यशुद्धिः, स्त्रीधर्माः, गार्हस्थ्यकालावधिश्चेत्येते प्रतिपाद्यन्ते। षष्ठे—वानप्रस्थानां संन्यासिनां च धर्मनिरूपणम्। सप्तमे—प्रजापालनादयो राजधर्मा निरूप्यन्ते। अष्टमनवमयोः—ऋणादानाद्यष्टादश व्यवहारपदानि वैश्यशूद्रधर्माश्च निर्णीयन्ते। दशमे—अनुलोमप्रातिलोमजाः, सङ्करजाः, ब्राह्मणादीनामापद्धर्माश्च निरूप्यन्ते। एकादशे—सान्तानिकादयो नवस्नातकाः, दानपात्रं, यज्ञार्थभिक्षादि, ब्रह्महत्यादिप्रायश्चित्तानि चाभिधीयन्ते। द्वादशेऽध्याये—मानसिकवाचिकदैहिकानि कर्माणि, तद्भेदाः, पूर्वोक्तशुभाशुभकर्मफलानि, देहान्तरप्राप्तिक्रमः, कर्मविपाकः, निश्रेयसोपयोगीनि कर्माणि, शिष्टपरिषदोर्लक्षणं, परमात्मस्वरूपं, इत्येतानि प्रतिपाद्यन्त इति सङ्ग्रहः॥

Noteworthy Features.—Manu has been accepted as an authority on Hindu Law. His work, being very well known, has undergone several editions and has been translated into several European languages. It has also several well-known commentaries, the most important of them being those of Medātithi and Kulluka.

वक्तव्यविशेषः—

स्मृतिरियं मुद्रिता दृश्यते॥

No. 81 (3149).

मनुस्मृतिः.

Manu Smṛtiḥ.

Author—Sage Bhṛgu.
Substance—Palm-leaf.
Size—$15\frac{3}{4} \times 1\frac{1}{8}$ inches.
Character—Grantha.
Folios—54-123.
Lines on a page—8.
Letters in a line—48.
Age of MS—Old.
Condition of MS—Good.
Correct or incorrect–Not so very correct.
Complete or incomplete—Incomplete.
Acquired or transcribed—Acquired.

Beginning :—

. . . . मातुरम् ।
रजस्वलमनित्यं च भूतावासमिमं त्यजेत् ॥
नदीजलं यथा वृक्षो वृक्षं वा शकुनिर्यथा ।
तथा त्यजन्निमं देहं कृच्छ्राद्ग्राहाद्विमुच्यते ॥
प्रियेषु स्वेषु सुकृतमप्रियेषु च दुष्कृतम् ।
विसृज्य ध्यानयोगेन ब्रह्माप्येति सनातनम् ॥ २१ ॥

End and Subject as in No. 80.

Noteworthy Features.—This is an incomplete copy of the work commencing from the end of the 6th Chapter.

वक्तव्यविशेषः—

कोशेऽस्मिन् इयं स्मृतिः षष्ठाध्यायान्त्यभागमारभ्य समग्रा दृश्यते ॥

No. 82 (3899).

मनुस्मृतिः.

Manu Smṛtiḥ.

Author—Sage Bhṛgu.
Substance—Palm-leaf.
Size—$12\frac{1}{4} \times 1\frac{1}{8}$ inches.
Character—Grantha.

Folios—1-148.
Lines on a page—8.
Letters in a line—38.
Age of MS—Old.
Condition of MS—Not good.
Correct or incorrect—Not so very correct.
Complete or incomplete—Complete.
Acquired or transcribed—Acquired.

Beginning, End, Colophon, etc.—As in No. 80.

No. 83 (33).

मनुस्मृतिव्याख्या.

Manu Smṛti Vyākhyā.

Author—Nandana Pandita.
Substance—Palm-leaf.
Size—$17\frac{1}{2} \times 1\frac{3}{8}$ inches.
Character—Telugu.
Folios—1-84.
Lines on a page—8.
Letters in a line—84.
Age of MS—Old.
Condition of MS—Good.
Correct or incorrect—Correct.
Complete or incompiete—Complete.
Acquired or transcribed—Acquired.

Beginning :—

मनुमिति। मनुः स्वायम्भुवः, तथा च वक्ष्यति "स्वायम्भुवो मनुर्धीमानिदं शास्त्रमकल्पयत्" इति। एकाग्रं अवहितम्। एतेन वक्ष्यमाणेष्वर्थेषु सन्देहराहित्यमभिप्रेतम्, इदं वक्ष्यमाणम्, भगवन्निति। न केवलं त्रैवर्णिकानामेव किन्तु शूद्राणामपीत्युक्तं सर्वशब्दग्रहणेन। अन्तरप्रभवानां वर्णसंकरजानाम्, धर्मान् विहितानुष्ठानप्रतिषिद्धवर्जनलक्षणान्। जरायुजेति। भूतग्रामस्य महदादितत्त्वसङ्घस्य, आचाराणामिति। कार्याणां विवादपदानाम्। यथाकालमवसरे प्राप्ते यथायोगमुचितेनोपायेन लक्षणेन प्रतिपदोक्तथा वेति यावत्। त्वमिति। विधीयत इति विधानम्, स्वयम्भुवा भगवता विहितस्य अचिन्त्यस्य अप्रमेयस्य अपर्यन्तस्य सर्वस्य प्राणिजातस्य कार्यं धर्मं तस्य तत्त्वं परमार्थमर्थः प्रयोजनं अभ्युदयसिद्धिरूपं त्वमेको वेत्सि। अतो भवानेव

प्रष्टव्यो नान्य इति । स तैः पृष्ट इति । भवन्त एव सर्वधर्मज्ञा इति च सम्भाव्याः । आत्मनः प्रवचनादरप्रकाशनार्थमुक्तं श्रूयतामिति ॥

End :—

ननु क्वचिदग्न्यादयोऽपि ध्येयत्वेनोच्यन्ते तत्राह—एवमिति । एतदुक्तं भवति—तत्तन्मन्त्रेष्वग्न्यादिशब्दप्रतिपाद्यः परः पुमानेव नान्य इति । एवं वदता पुरुषसूक्तानुसारेण मन्त्रान्तराणि योजयितव्यानि, न तदनुसारेण पुरुषसूक्तमित्युक्तं भवति । तदुक्तं महाभारते मोक्षधर्मेषु "इदं पुरुषसूक्तं हि सर्ववेदेषु पठ्यते । ऋतं सत्यं च प्रख्यातमृषिसिंहेन चिन्तितम्" इति । एष इति । एष परः पुरुषः पञ्चभिर्मूर्तिभिः महाभूताख्याभिः । एवं प्रपञ्चितस्य परमात्मज्ञानस्य फलमाह—एवमिति । आत्मना मनसा ब्रह्म परं पुरुषम् । शास्त्राध्ययनस्य फलमाह—इत्येतदिति । यथेष्टां गतिमाप्नुयात् यथेष्टं फलमाप्नोति ॥

Colophon:—

इति भरद्वाजगोत्रेण श्रीलक्ष्मणात्मजेन श्रीवीरमल्लप्रियसखेन
श्रीनन्दनेन विरचिते मनुव्याख्याने द्वादशोऽध्यायः ॥

Subject:—

As in No. 80.

प्रतिपाद्यविषयः—

अत्र व्याख्यायां मूलगततत्तत्क्लिष्टपदविवरणपूर्वकं 80 तममनुस्मृतिमूलकोशे प्रदर्शितानां विषयाणां नातिसङ्ग्रहं नातिविस्तृतं च विवरणं दृश्यते ॥

Noteworthy Features.—The original text is explained by commenting upon the difficult words and passages. This work has been printed. From the colophon at the end of the work, we learn that the author belongs to Bharadvāja gōtra and is the son of Laxmaṇa and an intimate friend of Viramalla. But, according to the printed text of the work, he is the brother of Laxmaṇa.

वक्तव्यविशेषः—

मुद्रितेयं व्याख्या । कोशेऽस्मिन् प्रथमाध्याये मुद्रितापेक्षया बहुत्र वैलक्षण्यं दृश्यते ॥

No. 84 (4629).

मनुस्मृतिव्याख्या.

Manu Smṛti Vyākhyā.

Author—Nandana Pandita.
Substance—Palm-leaf.
Size—$14\frac{1}{4} \times 1\frac{1}{4}$ inches.
Character—Nāgari.
Folios—1–137.
Lines on a page—6.
Letters in a line—63.

Age of MS—Old.
Condition of MS—Not good.
Correct or incorrect—Incorrect.
Complete or incomplete—Incomplete.
Acquired or transcribed—Acquired.

Beginning:—

As in No. 83.

End:—

ज्येष्ठः कुलमिति। ज्येष्ठ उक्तलक्षणः कुलं वर्धयति, इतरो नाशयति, तस्माल्लोके पूज्यतमस्सद्भिर ˙ ˙ तश्च तथाविधो ज्येष्ठः, नान्यथा ज्येष्ठ इति। ज्येष्ठवृत्तिः पितृवत्पालकः। एवं सहेति। वसेयुर्भ्रातरः। विभागपक्षे कर्तव्यमाह—ज्येष्ठस्य विंश इति। सर्वद्रव्याद्विंशो विंशतिभागः उद्धारो ज्येष्ठस्य स्यात्, यत्सर्वद्रव्याद्वरं तच्च तस्योद्धारः स्यात्। मध्यमस्य ततोऽर्धम्। परिशिष्टेभ्यः एकोनविंशतिभागेभ्यो ज्येष्ठोद्धारपरिमाणादर्धपरिमाण उद्धारस्स्यात्। तन्मध्यमस्य ततोऽर्धपरिमाणः तुरीयपरिमाण उद्धारस्स्यात्। मध्यमानां ॥

Subject:—

As in No. 83.

Noteworthy Features.—The copy is incomplete and contains commentary up to the 112th sloka in the IX Chapter.

वक्तव्यविशेषः—

कोशेऽस्मिन्नियं व्याख्या आदितो नवमाध्याये 112 श्लोकविवरणपर्यन्ता दृश्यते। व्याख्याता चायं नन्दनपण्डितः भारद्वाजगोत्रोद्भूतो वीर-

मल्लप्रियसखो लक्ष्मणात्मज इति व्याख्यान्त्यपरिदृश्यमानप्रशस्तिपङ्क्त्या ज्ञायते । मुद्रितकोशे तु लक्ष्मणानुजोऽयमिति निर्दिश्यते ॥

No. 85 (4634).

मनुस्मृतिः (सव्याख्या).

Manu Smṛti (with commentary).

Author—Kulluka Bhatta.
Substance—Palm leaf.
Size—15×1½ inches.
Character—Telugu.
Folios—1–81.
Lines on a page—7.
Letters in a line—63.
Age of MS—Old.

Condition of MS—
Not good. Some of the leaves are broken.
Correct or incorrect—
Correct.
Complete or incomplete—
Incomplete.
Acquired or transcribed—
Acquired.

Beginning :—

गौडे नन्दनवासिनाम्नि सुजनैर्वन्द्ये वरेन्द्र्यां कुले
श्रीमद्भट्टदिवाकरस्य तनयः कुल्लूकभट्टोऽभवत् ।
काश्यामुत्तरवाहिजह्नुतनयातीरे समं पण्डितैः
तेनेयं क्रियते हिताय विदुषां मन्वर्थमुक्तावली ॥ १ ॥
सर्वज्ञस्य मनोरसर्वविदपि व्याख्यामि यद्वाङ्मयं
युक्त्या तद्बहुभिर्यतो मुनिवरैरेतद्बहु व्याहृतम् ।
तां व्याख्यामधुनातनैरपि कृतां न्याय्यां ब्रुवाणस्य मे
भक्त्या मानववाङ्मये भवभिदे भूयादशेषेश्वरः ॥ २ ॥
मीमांसे बहुसेविताऽसि सुहृदस्तर्काः समस्ताः स्थ मे
वेदान्ताः परमात्मबोधगुरवो यूयं मयोपासिताः ।
जाता व्याकरणानि बालसखिता युष्माभिरभ्यर्थये
प्राप्तोऽयं समयो मनूक्तविवृतौ साहाय्यमालम्ब्यताम् ॥ ३ ॥
द्वेषादिदोषरहितस्य सतां हिताय मन्वर्थतत्त्वकथनाय ममोद्यतस्य ।
दैवाद्यदि क्वचिदिह स्खलनं तथाऽपि निस्तारको भवतु मे
[जगदन्तरात्मा ॥ ४ ॥

मानववृत्तावस्यां ज्ञेया व्याख्या न वा मयोद्भिन्नाः ।
प्राचीना अपि रुचिरा व्याख्यातॄणामशेषाणाम् ॥
मनुमेकाग्रमासीनमभिगम्य महर्षयः ।
प्रतिपूज्य यथान्याय्यमिदं वचनमब्रुवन् ॥

End:—

यं वदन्तीति । तमोगुणबहुला मूर्खा धर्मप्रमाणवेदार्थानभिज्ञाः अत एव प्रश्नविषयधर्माविदः प्रायश्चित्तादिधर्मं यं पुरुषं प्रत्युपदिशन्ति तदीयं पापं शतगुणं भूत्वा वाचकान् बहून् भजते ।
एतद्वोऽभिहितं सर्वं निःश्रेयसकरं परम् ।
अस्मादप्रच्युतो विप्रः प्राप्नोति परमां गतिम् ॥

Subject:—

This is a concise and lucid commentary on the Manu Smṛti.

प्रतिपाद्यविषयः—

कुल्लूकभट्टप्रणीतायामस्यां मनुस्मृतिव्याख्यायां मन्वर्थमुक्तावल्यभिख्यायां मूलस्थक्लिष्टपदानां नातिव्याससमासं विवरणं दृश्यते ॥

Noteworthy Features.—This commentary of Kulluka, known as the Manvarthamuktāvalī, is the most famous of all the commentaries on the Manu text. It has been printed several times.

Kulluka, we learn from the introductory verse of the work, came of a Varendra Brahmin family of Bengal residing in Nandana and was the son of Bhatta Divākara. He is decidedly later than Dharaṇīdhara to whom he refers and Medātithi and Govindarāja to whom he is very much indebted.

The manuscript copy, being incomplete, contains only Chapters IV, VI and XII and the commentary on Chapters IV and VI is not complete.

वक्तव्यविशेषः—

मुद्रितेयं व्याख्या । अस्मिन् कोशे प्रथमचतुर्थषष्ठसमग्रप्रायद्वादशाध्यायाः सव्याख्याः परिदृश्यन्ते । तत्र षष्ठाध्यायं विना इतरे असमग्राः ।

व्याख्याता चेयं कुल्लूकभट्टः गौडदेशे नन्दनवासिनाम्नि स्थाने वरेन्द्रीकुलसम्भूतो दिवाकरभट्टतनुज इति व्याख्याग्रन्थोपोद्घातदर्शनादवसीयते। इयं च व्याख्या मेधातिथिगोविन्दराजधरणीधरादिप्रणीतव्याख्याभ्यः पराचीनेत्यत्र तत्तद्व्याख्याग्रन्थानुवादस्य क्वचित्क्वचित्तत्तत्खण्डनस्य च दर्शनादवसीयते ॥

No. 86 (2852/6).

यमस्मृतिः.

Yama Smṛtiḥ.

Author—Yama.
Substance—Palm-leaf.
Size—$19\frac{1}{8} \times 1\frac{3}{4}$ inches.
Character—Grantha.
Folios—190-192.
Lines on a page—9.
Letters in a line—60.
Age of MS—Old.
Condition of MS—Good.
Correct or incorrect—Not so very correct.
Complete or incomplete—Complete.
Acquired or transcribed—Acquired.

Beginning :—

श्रुतिस्मृत्युदितं धर्मं वर्णानामनुपूर्वशः।
प्राब्रवीदृषिभिः पृष्टो मुनीनामग्रणीर्यमः॥
यो भुञ्जानोऽशुचिर्वाऽपि चण्डालं पतितं स्पृशेत्।
क्रोधादज्ञानतो वाऽपि तस्य वक्ष्यामि निष्कृतिम्॥
षड्रात्रं वा त्रिरात्रं वा यथासङ्ख्यं समाचरेत्।
स्नात्वा त्रिषवणं विप्रः पञ्चगव्येन शुध्यति॥

End :—

देवतानां पितॄणां च जले दद्याज्जलाञ्जलीन्।
असंस्कृतप्रमीतानां स्थले दद्याज्जलाञ्जलीन्॥
श्राद्धे हवनकाले च दद्यादेकेन पाणिना।
उभाभ्यां तर्पणे दद्यादिति धर्मो व्यवस्थितः॥

Colophon :—

इति यमप्रणीतं धर्मशास्त्रं समाप्तम् ॥

प्रतिपाद्यविषयः —

भोजनकालिकचण्डालादिस्पर्शादौ, उच्छिष्टस्य चण्डालादिस्पर्शे, रजस्वलासंस्पर्शे, रजस्वलायाः श्वादिसंस्पर्शे च प्रायश्चित्तानि, भर्तृशुश्रूषाऽकरणे, अपतितबन्धुत्यागे च दण्डः, आत्मत्यागिषु विधिः, जलाद्युद्बन्धनभ्रष्टादीनां प्रायश्चित्तम्, अज्ञानाच्चण्डालान्नभक्षणे प्रायश्चित्तं, अन्त्यजलक्षणं, अन्त्यजान्नभक्षणे तत्स्त्रीगमने च प्रायश्चित्तं, मात्रादिगमने प्रायश्चित्तं, गोवधप्रायश्चित्तं प्रायश्चित्ताङ्गवपनस्य स्त्र्यादिविषयेऽपवादः, क्रिमिदष्टादिविषये प्रायश्चित्तं, इष्टापूर्तफलं, पञ्चगव्यविधानं, सूतकसंपाते निर्णयः, श्राद्धस्य पञ्चविधत्वं, अस्थिसंचयनकालः, वृषोत्सर्गफलं, जलाञ्जलिविध्यादि इत्येतत्सर्वमत्र निरूप्यते ॥

Subject:—

Deals with Prāyaścittās for various lapses, purification and Srāddha.

Noteworthy Features.—This version has been printed in the Anandāśrama Series.

वक्तव्यविशेषः—

मुद्रितेयं स्मृतिरानन्दाश्रमग्रन्थमालायां दृश्यते ॥

No. 87 (3154/4).

* **यमस्मृतिः.**

* Yama Smṛtiḥ.

Author—Yama.
Substance—Palm-leaf.
Size—$14\frac{3}{4}\times1\frac{1}{2}$ inches.
Character—Grantha.
Folios—17–23.
Lines on a page—8.
Letters in a line—52.
Age of MS—Old.

Condition of MS—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.
Acquired or transcribed—Acquired.

Beginning:—

आश्रमस्थं सुखासीनं वेदशास्त्रविशारदम्।
अपृच्छन्नृषयो नत्वा यमं यतितमानसम्॥
महापातकसंयुक्ता उपपातकिनस्तथा।
यैर्यैर्व्रतैर्विशुध्यन्ति तन्नो ब्रूहि महामुने॥

यमः—

दिवा वातार्कसंस्पृष्टं रात्रौ नक्षत्रमारुतैः।
सन्ध्याद्वयोर्वा सन्ध्याभ्यां पवित्रं सर्वदा जलम्॥

End:—

चतुर्विधा क्रिया प्रोक्ता संसिध्यति च मार्गतः।
कुलादयो विवादस्य श्रवणेऽधिकृतागमात्॥
कोणेऽप्यधिगता शास्त्रैर्ब्राह्मणेन विपश्चिता॥

इति यमस्मृतौ द्वितीयोऽध्यायः॥

Colophon:—

यमस्मृतिस्समाप्ता॥

Subject:—

The first chapter deals with purification and prāyaścittas and the second with the various punishments to be awarded by the king to the sinners who do not undergo the ordained prāyaścittas.

प्रतिपाद्यविषयः—

यमनाम्ना केन चिन्महर्षिणा प्रणीतायामस्यां स्मृतौ प्रथमाध्याये—उदकादीनां शुद्ध्यभिधानपूर्वकं महापातकोपपातकानां प्रायश्चित्तमभिधीयते॥

द्वितीयेऽध्याये—पातकिनां प्रायश्चित्तमकुर्वतां च राज्ञा प्रयोक्तव्या दण्डविशेषास्तत्तत्पातकानुरोधेनाभिधीयन्ते॥

Noteworthy Features.—This is another version of the Smṛti, quite different from the one described above.

वक्तव्याविशेषः—

परस्परविभिन्नतया कल्कत्तानन्दाश्रममुद्रितयमबृहद्यमस्मृतिभ्यामुभाभ्यामपि विलक्षणेयं यमस्मृतिरत्र दृश्यते ॥

कोशेऽस्मिन् अस्याः स्मृतेः अध्यायद्वितयेन विभागदर्शनादत्रत्यकोशान्तरेषु प्रथमाध्यायमात्रदर्शनात्तत्रत्यस्मृतिसमग्रतासूचकं ग्रन्थान्तलेखनं लेखकप्रमादायत्तमिति विभाव्यते ॥

No. 88 (A. 137/5).

*** यमस्मृतिः.**

* Yama Smṛtiḥ.

Author—Yama.
Substance—Paper.
Size—12 × 8 inches.
Character—Telugu.
Folios—518–525.
Lines on a page—16.
Letters in a line—16.
Age of MS—Old.
Condition of MS—Good.
Correct or incorrect—Not very correct.
Complete or incomplete—Incomplete.
Acquired or transcribed—Acquired.

Beginning :—

As in No. 87.

End:—

चान्द्रायणादीनि तु पातकानि (पावनानि)
पापं दहन्तीह हिताय मर्त्यः ? ।
संसर्गमिच्छन्ति फलन्ति काले
ज्ञानप्रदीपे न तमोऽन्धतामसे ॥

Colophon :—

इति यमकृतधर्मशास्त्रं समाप्तम् ॥

Subject :—

Deals with purification (Suddhi) and Prāyaścittas for lapses.

प्रतिपाद्यविषयः—

अत्र उदकादीनां शुद्धिः, महापातकोपपातकानां केषां चित्प्रायश्चित्तानि चाभिधीयन्ते। मुद्रितयमस्मृतिघटकानि कानिचिदेव पद्यान्यत्र दृश्यन्ते। ततोऽतिवैलक्षण्यमप्यस्ति॥

Noteworthy Features.—This version is quite different from those printed at Calcutta and Anandāśrama and contains only 59 slokas, while the Calcutta version contains 78 slokas. It seems to be identical with the MS copy described as No. 5384 in the India Office Catalogue. Though most of the topics of this version are the same as those of the Calcutta version, most of the verses are not identical. Whether the Smṛti ended as in this version or contained two chapters as in the version described under No. 87 cannot be decided on the data now available.

वक्तव्यविशेषः—

No. 87 **तमे यमस्मृतिकोशे अध्यायद्वयदर्शनात्कोशेऽस्मिन् प्रथमाध्यायमात्रोपलम्भादियमसमग्रेति ज्ञायते। मुद्रितयमबृहद्यमस्मृतिभ्यामुभाभ्यामपि विलक्षणेयं स्मृतिः कोशेऽस्मिन् दृश्यते। आनन्दाश्रमकलकत्तानगरयोर्मुद्रिते यमस्मृती अपि परस्परं विभिन्ने दृश्येते॥**

No. 89 (A 669/12).

*** यमस्मृतिः.**

* Yama Smṛtiḥ.

Author—Yama.
Substance—Paper.
Size—13 × 8⅜ inches.
Character—Telugu.
Folios—122–123.
Lines on a page—26.
Letters in a line—24.
Age of MS—Old.

Condition of MS—Good.
Correct or incorrect—
Correct.
Complete or incomplete—
Complete.
Acquired or transcribed—
Acquired.

Beginning, End, etc.—As in No. 87.

No. 90 (4487/5).

*** यमस्मृतिः.**

* Yama Smṛtiḥ.

Author—Yama.
Substance—Palm-leaf.
Size—10 × 2 inches.
Character—Nāgari.
Folios—25–28.
Lines on a page—9.
Letters in a line—44.
Age of MS—Old.
Condition of MS—Good.
Correct or incorrect—Incorrect.
Complete or incomplete—Incomplete.
Acquired or transcribed—Acquired.

Beginning:—

As in No. 87.

End:—

तर्का (र्कैः) प्रमाणैः प्रति तर्कयित्वा
केचिद्वदन्त्येवमिदं प्रमाणम् ।
नित्यं न जीवो म्रियते कदाचित्
वेदैश्च पृष्टैः ऋषिभिश्च गीतम् ॥
चान्द्रायणादीनि हि पावनानि
पापा यदिच्छन्ति हिताय कर्तुम् ।
संसारमिच्छन्ति फलं तथा स्यु-
र्ज्ञानप्रदीपे न तमोन्धकारे ॥

Colophon:—

इति यमेन कृतं धर्मशास्त्रं सम्पूर्णम् ॥

Subject, etc., as in No. 88.

No. 91 (3583/1).

याज्ञवल्क्यस्मृतिः.

Yājñavalkya Smṛtiḥ.

Author—Sage Yājñavalkya
Substance—Palm leaf.
Size—23 × $1\frac{7}{8}$ inches.
Character—Grantha.

Folios—167–209.
Lines on a page—7.
Letters in a line—52.
Age of MS—Old.
Condition of MS—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.
Acquired or transcribed—Acquired.

Beginning:—

योगीश्वरं याज्ञवल्क्यं संपूज्य मुनयोऽब्रुवन् ।
वर्णाश्रमेतराणां नो ब्रूहि धर्मानशेषतः ॥
मिथिलास्थस्स योगीन्द्रः क्षणं ध्यात्वाऽब्रवीन्मुनीन् ।
यस्मिन् देशे मृगः कृष्णस्तस्मिन् धर्मान्निबोधत ॥
पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः ।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ॥

End:—

ब्राह्मणः पात्रतामेति क्षत्रियो विजयी भवेत् ।
वैश्यस्तु धान्यधनवानस्य शास्त्रस्य धारणात् ॥
श्रुत्वैतद्याज्ञवल्क्यस्तु प्रीतात्मा मुनिभाषितम् ।
एवमस्त्विति होवाच नमस्कृत्य स्वयंभुवे ॥
अध्यायत्रयसंक्षिप्तं शास्त्रं बुद्धिविवर्धनम् ।
अनुष्टुप्छन्दसं ह्येतद्याज्ञवल्क्येन भाषितम् ।
सर्वपापहरं पुण्यं सुप्रसन्नसमञ्जसम ।
श्लोकाना....विज्ञेयं सहस्रं चतुरुत्तरम् ॥
आदित्यस्य प्रसादेन प्राप्तवान्यो यजुर्गणान् ।
प्रणम्य याज्ञवल्क्यस्तु पिप्पलादगुरोरहम् ॥
निर्जित्य वादसमरे ऋषीन् सर्वानुपस्थितान् ॥
गावो येनाहृतास्तस्मै नमोऽस्तु ब्रह्मरातये ।
अयातयामान्यमृतानि वाचा दिवाकराद्योऽधिजगे यजूंषि ।
स याज्ञवल्क्यः ककुदं मुनीनामाध्वर्यवो ब्रह्मनिधिः स्थितोऽत्र ॥
प्रकाशिता येन यजूंषि लोके भानोस्सकाशा .... वाप्य ।
तं याज्ञवल्क्यं ककुदं मुनीनां नमस्करोम्यार्तिहरं मुनीन्द्रम् ॥

Colophon:—

इति याज्ञवल्क्यधर्मशास्त्रे प्रायश्चित्तं नाम तृतीयोऽध्यायः ॥
समाप्ता स्मृतिः.

Subject:—

The work is divided into three broad sections. The first deals with the fourteen vidyas, the expounders of the sources of Dharma, the Samskāras from Garbhādana to marriage, privileges and duties of the four varṇas, duties of the king, details about gifts, suddhi and srāddha, etc.

The second section, known as the Vyavahārapāda, is concerned with the exposition of all topics about the administration of justice, criminal and civil. The third section is divided into two parts, the first dealing with Aśauca and the second with the Prāyaścittas.

प्रतिपाद्यविषयः—

आचारव्यवहारप्रायश्चित्ताख्यैस्त्रिभिरध्यायैर्विभक्तेयं स्मृतिः । तत्राचाराध्याये—शास्त्रोपोद्धातः, धर्मस्य चतुर्दश स्थानानि, स्मृतिनामानि, धर्मस्य कारकज्ञापकहेतवः, तेषु संशये निर्णयक्रमः, ब्रह्मचर्यं, तत्कालतन्नियमाः, समावर्तनं, कन्यावरलक्षणादि, सापिण्डयं, विवाहः, तद्भेदाः, तल्लक्षणं, देवरनियोजनं, स्त्रीधर्माः, सवर्णानुलोमप्रतिलोमसंकरसंकीर्णसंकरजाः, वर्णान्तरप्राप्तिक्रमः, गृहस्थद्विजकर्माणि, साधारणधर्माः, श्रौतकर्मादि, स्नातकव्रतानि, उपाकर्मोत्सर्जनानध्यायकालाः, भोज्यान्नादि, भक्ष्याभक्ष्यानिरूपणं, सुवर्णादिद्रव्यशुद्धिः, दानपात्रतत्प्रशंसादि, श्राद्धविभागः, तत्कालाः, फलविशेषाश्च, विघ्नशान्तिकर्म, नवग्रहपूजादि, राजधर्माः, त्रसेराण्वादिमानं, उत्तमसाहसादि दण्डप्रमाणानि चाभिधीयन्ते ॥

द्वितीये व्यवहाराध्याये—व्यवहारसभ्यलक्षणानि, व्यवहारविषयः, भाषोत्तरक्रियासाध्यसिद्ध्याख्याश्चत्वारो व्यवहारपादाः, व्यवहारविशेषे अर्थिप्रत्यर्थ्यादिकृत्यं, साहसादिषूत्तरदाने कालाविलम्बः; दुष्टलक्षणानि, स्मृत्योर्विरोधे न्यायप्राबल्यं; धर्मशास्त्रघटकार्थशास्त्रापेक्षया धर्मशास्त्रप्राबल्यं, प्रमाणलिखितादीनि प्रतिज्ञातार्थसाधनानि, उभयत्र प्रमाणसत्त्वे निर्णयक्रमः, भोगप्रामाण्यं तत्र विशेषाः, नष्टाधिगमनिध्यधिगममुषितेषु विधिः, ऋणदानप्रतिग्रहादिषु वृद्ध्यादिनिर्णयः, निक्षेपादिषु विधिः, साक्षिसंख्यालक्षणानि, साक्ष्यनुयोगक्रमः, साक्ष्यानुक्त्यादौ दण्डादि, वर्णिवधादौ संभावितेऽसत्यवदनाभ्यनुज्ञा, तदंहोनिबर्हणोपायः, लेख्यस्वरूपतन्निर्णयादि, तुलादिदिव्यप्रमाण-

